shrI lalitA sahasra nAma stotram

# શ્રીલલિતાસહસ્રનામસ્તોત્રમ્ પૂર્વપીઠિકા ફલશ્રુતિ સહિતમ્

## Document Information

Text title : lalitAsahasranAmastotram complete

File name : lalitacomplete.itx

Category : sahasranAma, devii, dashamahAvidyA, lalitA, stotra, devI

Location : doc_devii

Transliterated by : M. Giridhar giridharmadras at gmail.com

Proofread by : M. Giridhar, Kirk Wortman, Sunder Hattangadi, DPD, Rajani Arjun Shankar

Translated by : Comments by M. Giridhar

Description-comments : With pUrvapIThikA and phalashruti

Latest update : August 2, 2002, August 26, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 27, 2023

*sanskritdocuments.org*

# શ્રીલલિતાસહસ્રનામસ્તોત્રમ્ પૂર્વપીઠિકા ફલશ્રુતિ સહિતમ્

માતઃ શ્રીલલિતે પ્રસીદ !
લૌહિત્યનિર્જિત જપાકુસુમાનુરાગાં
પાશાઙ્કુશૌ ધનુરિષૂનપિ ધારયન્તીમ્ ।
તામ્રેક્ષણામરુણમાલ્યવિશેષભૂષાં
તામ્બૂલપૂરિતમુખીં ત્રિપુરાં નમામિ ॥ ૧॥

મધુરાન્મધુરા મહિતાન્મહિતા
મૃદુલાન્મૃદુલા સુલભાત્સલભા ।
અરુણાદરુણા સદયાત્સદયા
લલિતાલ્લલિતા લલિતાઽવતુ મામ્ ॥ ૨॥

લલિતં ચરણસરોજે લલિતતરં વદનશીતરુચિબિમ્બે ।
લલિતતમં સ્મિતરોચિષિ લલિતાખ્યં વસ્તુ મે પુરતઃ ॥ ૩॥

ત્વત્પ્રસૂતસ્ત્વદાજ્ઞપ્તસ્ત્વદાસસ્ત્વત્પરાયણઃ ।
ત્વન્નામચિન્તનપરસ્ત્વદર્થેઽહં નિયોજિતઃ ॥ ૪॥

ત્વયાર્જિતમિદં સર્વં તવ સ્વં પરમેશ્વરિ ।
ત્વદધીનં કરોમીહ ત્વદર્થે તન્નિયોજયે ॥ ૫॥

તવ દેવિ વશે વર્તે તવાજ્ઞામેવ પાલયન્ ।
તવ નામાનિ ગણયન્ ત્વયિ લીયે ગહાણ મામ્ ॥ ૬॥

એષા ભક્ત્યા તવ વિરચિતા યા દેવિ સેવા
સ્વીકૃત્યૈનાં સપદિ સકલાન્મેઽપરાધાન્ ક્ષમસ્વ ।
ન્યૂનં યત્તત્તવ કરુણયા પૂર્ણતામેતુ સદ્યઃ
સાનન્દ મે હૃદયકમલે તેઽસ્તુ નિત્યં નિવાસઃ ॥ ૭॥

શ્રીલલિતાસહસ્રનામસ્તોત્રમ્
(ઉપોદ્ઘાતાખ્યા પ્રથમા કલા)

ગુરુર્બ્રહ્મા ગુરુર્વિષ્ણુઃ ગુરુર્દેવો મહેશ્વરઃ ।
ગુરુઃ સાક્ષાત્પરં બ્રહ્મ તસ્મૈ શ્રીગુરવે। નમઃ ॥ ૧॥

વન્દે ગુરુપદદ્વન્દ્વમવાઙ્મનસગોચરમ્ ।
રક્તશુક્લપ્રભામિશ્રં અતર્ક્યં ત્રૈપુરં મહઃ ॥ ૨॥

શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં વન્દે સર્વવિઘ્નોપશાન્તયે ॥ ૩॥

ત્રિપુરાં કુલનિધિમીડેઽરુણશ્રિયં કામરાજવિદ્ધાઙ્ગીમ્ ।
ત્રિગુણૈર્દેવૈર્નિનુતામેકાન્તાં બિન્દુગાં મહારમ્ભામ્ ॥ ૧॥

લલિતાનામસહસ્રે છલાર્ણસૂત્રાનુયાયિન્યઃ ।
પરિભાષા ભાષ્યન્તે સઙ્ક્ષેપાત્કૌલિકપ્રમોદાય ॥ ૨॥

પઞ્ચાશદેક આદૌ નામસુ સાર્ધદ્વ્યશીતિશતમ્ ।
ષડશીતિઃ સાર્ધાન્તે સર્વે વિંષતિશતત્રયં શ્લોકાઃ ॥ ૩॥

દશભૂઃ સાર્ધનૃપાલા અધ્યુષ્ટં સાર્ધનવષડધ્યુષ્ટમ્ ।
મુનિસૂતહયામ્બાશ્લોક્તિર્ધ્યાનમેકેન ॥ ૪॥ BSR part 2 NR AchArya

અગસ્ત્ય ઉવાચ -
અશ્વાનન મહાબુદ્ધે સર્વશાસ્ત્રવિશારદ ।
કથિતં લલિતાદેવ્યાઃ ચરિતં પરમાદ્ભુતમ્ ॥ ૧॥

પૂર્વં પ્રાદુર્ભવો માતુઃ તતઃ પટ્ટાભિષેચનમ્ ।
ભણ્ડાસુરવધશ્ચૈવ વિસ્તરેણ ત્વયોદિતઃ ॥ ૨॥

વર્ણિતં શ્રીપુરં ચાપિ મહાવિભવવિસ્તરમ્ ।
શ્રીમત્પઞ્ચદશાક્ષર્યાઃ મહિમા વર્ણિતસ્તથા ॥ ૩॥

ષોઢાન્યાસાદયો દેવ્યાઃ ન્યાસખણ્ડે સમીરિતાઃ ।
અન્તર્યાગક્રમશ્ચૈવ બહિર્યાગક્રમસ્તથા ॥ ૪॥

મહાયાગાક્રમશ્ચાપિ પૂજાખણ્ડે સમીરિતાઃ ।
પુરશ્ચરણખણ્ડે તુ જપલક્ષણમીરિતમ્ ॥ ૫॥

હોમખણ્ડે ત્વયા પ્રોક્તો હોમદ્રવ્યવિધિક્રમઃ ।
ચક્રરાજસ્ય વિદ્યાયાઃ શ્રીદેવ્યા દેશિકાત્મનોઃ ॥ ૬॥

રહસ્યખણ્ડે તાદાત્મ્યં પરસ્પરમુદીરિતમ્ ।

સ્તોત્રખણ્ડે બહુવિધાઃ સ્તુતયઃ પરિકીર્તિતાઃ ॥ ૭॥

મન્ત્રિણીદણ્ડિનીદેવ્યોઃ પ્રોક્તે નામસહસ્રકે ।
ન તુ શ્રીલલિતાદેવ્યાઃ પ્રોક્તં નામસહસ્રકમ્ ॥ ૮॥

તત્ર મે સંશયો જાતો હયગ્રીવ દયાનિધે ।
કિં વા ત્વયા વિસ્મૃતં તજ્જ્ઞાત્વા વા સમુપેક્ષિતમ્ ॥ ૯॥

મમ વા યોગ્યતા નાસ્તિ શ્રોતું નામસહસ્રકમ્ ।
કિમર્થં ભવતા નોક્તં તત્ર મે કારણં વદ ॥ ૧૦॥

સૂત ઉવાચ -
ઇતિ પૃષ્ટો હયગ્રીવો મુનિના કુમ્ભજન્મના ।
પ્રહૃષ્ટો વચનં પ્રાહ તાપસં કુમ્ભસમ્ભવમ્ ॥ ૧૧॥

શ્રીહયગ્રીવ ઉવાચ -
લોપામુદ્રાપતેઽગસ્ત્ય સાવધાનમનાઃ શૃણુ ।
નામ્નાં સહસ્રં યન્નોક્તં કારણં તદ્વદામિ તે ॥ ૧૨॥

રહસ્યમિતિ મત્વાઽહં નોક્તવાંસ્તે ન ચાન્યથા ।
પુનશ્ચ પૃચ્છતે ભક્ત્યા તસ્માત્તત્તે વદામ્યહમ્ ॥ ૧૩॥

બ્રૂયાચ્છિષ્યાય ભક્તાય રહસ્યમપિ દેશિકઃ ।
ભવતા ન પ્રદેયં સ્યાદભક્તાય કદાચન ॥ ૧૪॥

ન શઠાય ન દુષ્ટાય નાવિશ્વાસાય કર્હિચિત્ ।
શ્રીમાતૃભક્તિયુક્તાય શ્રીવિદ્યારાજવેદિને ॥ ૧૫॥

ઉપાસકાય શુદ્ધાય દેયં નામસહસ્રકમ્ ।
યાનિ નામસહસ્રાણિ સદ્યઃ સિદ્ધિપ્રદાનિ વૈ ॥ ૧૬॥

તન્ત્રેષુ લલિતાદેવ્યાસ્તેષુ મુખ્યમિદં મુને ।
શ્રીવિદ્યૈવ તુ મન્ત્રાણાં તત્ર કાદિર્યથા પરા ॥ ૧૭॥

પુરાણાં શ્રીપુરમિવ શક્તીનાં લલિતા યથા ।
શ્રીવિદ્યોપાસકાનાં ચ યથા દેવઃ પરઃ શિવઃ ॥ ૧૮॥

તથા નામસહસ્રેષુ પરમેતત્પ્રકીર્તિતમ્ ।
યથાસ્ય પઠનાદ્દેવી પ્રીયતે લલિતામ્બિકા ॥ ૧૯॥

અન્યનામસહસ્રસ્ય પાઠાન્ન પ્રીયતે તથા ।

શ્રીમાતુઃ પ્રીતયે તસ્માદનિશં કીર્તયેદિદમ્ ॥ ૨૦॥

બિલ્વપત્રૈશ્ચક્રરાજે યોઽર્ચયેલ્લલિતામ્બિકામ્ ।
પદ્મૈર્વા તુલસીપુષ્પૈરેભિર્નામસહસ્રકૈઃ ॥ ૨૧॥

સદા પ્રસાદં કુરુતે તસ્ય સિંહાસનેશ્વરી ।
ચક્રાધિરાજગભ્યર્ચ્ય જપ્ત્વા પઞ્ચદશાક્ષરીમ્ ॥ ૨૨॥

જપાન્તે કીર્તયેન્નિત્યમિદં નામસહસ્રકમ્ ।
જપસ્તાદ્યશક્તશ્ચેત્પઠેન્નામસહસ્રકમ્ ॥ ૨૩॥

સાઙ્ગાર્ચને સાઙ્ગજજપે યત્ફલં તદાપ્નુયાત્ ।
ઉપાસને સ્તુતીરન્યાઃ પઠેદભ્યુદયો હિ સઃ ॥ ૨૪॥

ઇદં નામસહસ્રં તુ કીર્તયેન્નિત્યકર્મવત્ ।
ચક્રરાજાર્ચનં દેવ્યા જપો નામ્નાં ચ કીર્તનમ્ ॥ ૨૫॥

ભક્તસ્ય કૃત્યમેતાવદન્યદભ્યુદયં વિદુઃ ।
ભક્તસ્યાવશ્યકમિદં નામસાહસ્રકીર્તનમ્ ॥ ૨૬॥

તત્ર હેતું પ્રવક્ષ્યામિ શ‍ૃણુ ત્વં કુમ્ભસમ્ભવ ।
પુરા શ્રીલલિતાદેવી ભક્તાનાં હિતકામ્યયા ॥ ૨૭॥

વાગ્દેવીર્વશિનીમુખ્યાઃ સમાક્ષેદમબ્રવીત્ ।
દેવ્યુવાચ -
વાગ્દેવતા વશિન્યાદ્યાઃ શ‍ૃણુધ્વં વચનં મમ ॥ ૨૮॥

ભવત્યો મત્પ્રસાદેન પ્રોલ્લસદ્વાગ્વિભૂતયઃ ।
મદ્ભક્તાનાં વાગ્વિભૂતિપ્રદાને વિનિયોજિતાઃ ॥ ૨૯॥

મચ્ચક્રસ્ય રહસ્યજ્ઞા મમ નામપરાયણાઃ ।
મમ સ્તોત્રવિધાનાય તસ્માદાજ્ઞાપયામિ વઃ ॥ ૩૦॥

કુરુધ્વમઙ્કિતં સ્તોત્રં મમ નામસહસ્રકૈઃ ।
યેન ભક્તૈઃ સ્તુતાયા મે સદ્યઃ પ્રીતિઃ પરા ભવેત્ ॥ ૩૧॥

હયગ્રીવ ઉવાચ -
ઇત્યાજ્ઞપ્તાસ્તતો દેવ્યઃ શ્રીદેવ્યા લલિતામ્બયા ।
રહસ્યૈર્નામભિર્દિવ્યૈશ્ચક્રુઃ સ્તોત્રમનુત્તમમ્ ॥ ૩૨॥

રહસ્યં નામસાહસ્રમિતિ તદ્વિશ્રુતં પરમ્ ।

તતઃ કદાચિત્સદસિ સ્થિત્વા સિંહાસનેઽમ્બિકા ॥ ૩૩॥

સ્વસેવાવસરં પ્રાદાત્ સર્વેષાં કુમ્ભસમ્ભવ ।
સેવાર્થમાગતાસ્તત્ર ત્વત્યાણીસ્રત્યકોટયઃ ॥ ૩૪॥

લક્ષ્મીનારાયણાનાં ચ કોટયઃ સમુપાગતાઃ ।
ગૌરીકોટિસમેતાનાં રુદ્રાણામપિ કોટયઃ ॥ ૩૫॥

મન્ત્રિણીદણ્ડિનીમુખ્યાઃ સેવાર્થં યાસ્સમાગતાઃ ।
શક્તયો વિવિધાકારાસ્તાસાં સંખ્યા ન વિદ્યતે ॥ ૩૬॥

દિવ્યૌઘા માનવૌઘાશ્ચ સિદ્ધૌઘાશ્ચ સમાગતાઃ ।
તત્ર શ્રીલલિતાદેવી સર્વેષાં દર્શનં દદૌ ॥ ૩૭॥

તેષુ દૃષ્ટ્વોપવિષ્ટેષુ સ્વે સ્વે સ્થાને યથાક્રમમ્ ।
તતઃ શ્રીલલિતાદેવીકટાક્ષાક્ષેપચોદિતાઃ ॥ ૩૮॥

ઉત્થાય વશિનીમુખ્યા બદ્ધાંજલિપુટાસ્તદા ।
અસ્તુવન્નામસાહસ્રૈઃ સ્વકૃતૈર્લલિતામ્બિકામ્ ॥ ૩૯॥

શ્રુત્વા સ્તવં પ્રસન્નાઽભૂલ્લ્લિતા પરમેશ્વરી ।
તે સર્વે વિસ્મયં જગ્ભુર્યે તત્ર સદસિ સ્થિતાઃ ॥ ૪૦॥

તતઃ પ્રોવાચ લલિતા સદસ્યાન્ દેવતાગણાન્ ।
મમાજ્ઞયૈવ વાગ્દેવ્યશ્ચક્રુઃ સ્તોત્રમાનુઽત્તમમ્ ॥ ૪૧॥

અઙ્કિતં નામભિર્દિવ્યૈર્મમ પ્રીતિવિધાયકૈઃ ।
તત્પઠધ્વં સદા યૂયં સ્તોત્રં મત્પ્રીતિવૃદ્ધયે ॥ ૪૨॥

પ્રવર્તયધ્વં ભક્તેષુ મમ નામસહસ્રકમ્ ।
ઇદં નામસહસ્રં મે યો। ભક્તઃ પઠતે સકૃત્ ॥ ૪૩॥

સ મે પ્રિયતમો જ્ઞેયસ્તસ્મૈ કામાન્દદામ્યહમ્ ।
શ્રીચક્રે માં સદાભ્યર્ચ્ય જપ્ત્વા પઞ્ચદશાક્ષરીમ્ ॥ ૪૪॥

પશ્ચાન્નામસહસ્રં મં કીર્તયેન્મમ તુષ્ટયે ।
મામર્ચયતુ વા મા વા વિદ્યાં જપતુ વા ન વા ॥ ૪૫॥

કીર્તયેન્નામસહસ્રમિદં મત્પ્રીતયે સદા ।
મત્પ્રીત્યા સકલાન્ કામાંલ્લભતે નાત્ર સંશયઃ ॥ ૪૬॥

તસ્માન્નામસહસ્રં મે કીર્તયધ્વં સદાદરાત્ ।
શ્રીહયગ્રીવ ઉવાચ -
ઇતિ શ્રીલલિતેશાની શાસ્તિ દેવાન્સહાનુગાન્ ॥ ૪૭॥

તદાજ્ઞયા તદારભ્ય બ્રહ્મવિષ્ણુમહેશ્વરાઃ ।
શક્તયો મન્ત્રણીમુખ્યા ઇદં નામસહસ્રકમ્ ॥ ૪૮॥

પઠન્તિ ભક્ત્યા સતતં લલિતાપરિતુષ્ટયે ।
તસ્માદવશ્યં ભક્તેન કીર્તનીયમિદં મુને ॥ ૪૯॥

આવશ્યકત્વે હેતુસ્તે મયા પ્રોક્તો મુનીશ્વર ।
ઇદાનીં નામસાહસ્રં વક્ષ્યામિ શ્રદ્ધયા શ◌ૃણુ ॥ ૫૦॥

ઇતિ લલિતાસહસ્રનામ્ન્યુપોદ્ઘાતપ્રકરણં સમાપ્તમ્ ॥

---

॥ ન્યાસઃ ॥

અસ્ય શ્રીલલિતાસહસ્રનામસ્તોત્રમહામન્ત્રસ્ય વશિન્યાદયો વાગ્દેવતા ઋષયઃ ।
અનુષ્ટુપ્ છન્દઃ । શ્રીલલિતા પરમેશ્વરી દેવતા ।
શ્રીમદ્વાગ્ભવકૂટેતિ બીજમ્ । મધ્યકૂટેતિ શક્તિઃ ।
શક્તિકૂટેતિ કીલકમ્ । ધ્યાનમ્ ।
મમ શ્રીલલિતામહાત્રિપુરસુન્દરીપ્રસાદસિદ્ધિદ્વારા
ચિન્તિતફલાવાપ્ત્યર્થે જપે વિનિયોગઃ ।
॥ કરન્યાસઃ ॥

ઐં અઙ્ગુષ્ઠાભ્યાં નમઃ । ક્લીં તર્જનીભ્યાં નમઃ ।
સૌઃ મધ્યમાભ્યાં નમઃ । સૌઃ અનામિકાભ્યાં નમઃ ।
ક્લીં કનિષ્ઠિકાભ્યાં નમઃ । ઐં કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
॥ અઙ્ગન્યાસઃ ॥

ઐં હૃદયાય નમઃ । ક્લીં શિરસે સ્વાહા । સૌઃ શિખાયૈ વષટ્ ।
સૌઃ કવચાય હું । ક્લીં નેત્રત્રયાય વૌષટ્ । ઐં અસ્ત્રાય ફટ્ ।
ભૂર્ભવસ્સુવરોમિતિ દિગ્બન્ધઃ ।
॥ ધ્યાનમ્ ॥

સિન્દૂરારુણ વિગ્રહાં ત્રિનયનાં માણિક્યમૌલિ સ્ફુરત્
તારા નાયક શેખરાં સ્મિતમુખીમાપીનવક્ષોરુહામ્ ।

પાણિભ્યામલિપૂર્ણરત્નચષકં રક્તોત્પલં બિભ્રતીં
સૌમ્યાં રત્ન ઘટસ્થ રક્તચરણાં ધ્યાયેત્ પરામમ્બિકામ્ ॥

અરુણાં કરુણાતરઙ્ગિતાક્ષીં ધૃતપાશાઙ્કુશપુષ્પબાણચાપામ્ ।
અણિમાદિભિરાવૃતાં મયૂખૈરહમિત્યેવ વિભાવયે ભવાનીમ્ ॥

ધ્યાયેત્ પદ્માસનસ્થાં વિકસિતવદનાં પદ્મપત્રાયતાક્ષીં
હેમાભાં પીતવસ્ત્રાં કરકલિતલસદ્ધેમપદ્માં વરાઙ્ગીમ્ ।
સર્વાલઙ્કારયુક્તાં સતત મભયદાં ભક્તનમ્રાં ભવાનીં
શ્રીવિદ્યાં શાન્તમૂર્તિં સકલસુરનુતાં સર્વ સમ્પત્પ્રદાત્રીમ્ ॥

સકુઙ્કુમવિલેપનામલિકચુમ્બિકસ્તૂરિકાં
સમન્દહસિતેક્ષણાં સશરચાપપાશાઙ્કુશામ્ ।
અશેષજનમોહિનીં અરુણમાલ્યભૂષામ્બરાં
જપાકુસુમભાસુરાં જપવિધૌ સ્મરામ્યમ્બિકામ્ ॥

લમિત્યાદિપઞ્ચપૂજા
"લં" પૃથિવીતત્ત્વાત્મિકાયૈ શ્રીલલિતાદેવ્યૈ ગન્ધં પરિકલ્પયામિ ।
"હં" આકાશતત્ત્વાત્મિકાયૈ શ્રીલલિતાદેવ્યૈ પુષ્પં પરિકલ્પયામિ ।
"યં" વાયુતત્ત્વાત્મિકાયૈ શ્રીલલિતાદેવ્યૈ ધૂપં પરિકલ્પયામિ ।
"રં" વહ્નિતત્ત્વાત્મિકાયૈ શ્રીલલિતાદેવ્યૈ દીપં પરિકલ્પયામિ ।
"વં" અમૃતતત્ત્વામિકાયૈ શ્રીલલિતાદેવ્યૈ અમૃતં મહાનૈવેદ્યં
પરિકલ્પયામિ ।
"સં" સર્વતત્ત્વાત્મિકાયૈ શ્રીલલિતાદેવ્યૈ સર્વોપચારપૂજાં
પરિકલ્પયામિ ।

(તતઃ પારાયણં કુર્યાત્ ।)

॥ અથ શ્રીલલિતાસહસ્રનામસ્તોત્રમ્ ॥

(દ્વિતીયા તાપિની કલા ૧-૧૦૦ નામાનિ)
શ્રીમાતા શ્રીમહારાજ્ઞી શ્રીમત્સિંહાસનેશ્વરી ।
ચિદગ્નિકુણ્ડસમ્ભૂતા દેવકાર્યસમુદ્યતા ॥ ૧॥

ઉદ્યદ્ભાનુસહસ્રાભા ચતુર્બાહુસમન્વિતા ।
રાગસ્વરૂપપાશાઢ્યા ક્રોધાકારાઙ્કુશોજ્જ્વલા ॥ ૨॥

મનોરૂપેક્ષુકોદણ્ડા પઞ્ચતન્માત્રસાયકા ।

નિજારુણપ્રભાપૂરમજ્જદ્બ્રહ્માણ્ડમણ્ડલા ॥ ૩॥

ચમ્પકાશોકપુન્નાગસૌગન્ધિકલસત્કચા ।
કુરુવિન્દમણિશ્રેણીકનત્કોટીરમણ્ડિતા ॥ ૪॥

અષ્ટમીચન્દ્રવિભ્રાજદલિકસ્થલશોભિતા ।
મુખચન્દ્રકલઙ્કાભમૃગનાભિવિશેષકા ॥ ૫॥

વદનસ્મરમાઙ્ગલ્યગૃહતોરણચિલ્લિકા ।
વક્ત્રલક્ષ્મીપરીવાહચલન્મીનાભલોચના ॥ ૬॥

નવચમ્પકપુષ્પાભનાસાદણ્ડવિરાજિતા ।
તારાકાન્તિતિરસ્કારિનાસાભરણભાસુરા ॥ ૭॥

કદમ્બમઞ્જરીક્લૃપ્તકર્ણપૂરમનોહરા ।
તાટઙ્કયુગલીભૂતતપનોડુપમણ્ડલા ॥ ૮॥

પદ્મરાગશિલાદર્શપરિભાવિકપોલભૂઃ ।
નવવિદ્રુમબિમ્બશ્રીન્યક્કારિરદનચ્છદા ॥ ૯॥ દશનચ્છદા

શુદ્ધવિદ્યાઙ્કુરાકારદ્વિજપઙ્ક્તિદ્વયોજ્જ્વલા ।
કર્પૂરવીટિકામોદસમાકર્ષિદિગન્તરા ॥ ૧૦॥

નિજસલ્લાપમાધુર્યવિનિર્ભર્ત્સિતકચ્છપી । નિજસંલાપ
મન્દસ્મિતપ્રભાપૂરમજ્જત્કામેશમાનસા ॥ ૧૧॥

અનાકલિતસાદૃશ્યચિબુકશ્રીવિરાજિતા । ચુબુકશ્રી
કામેશબદ્ધમાઙ્ગલ્યસૂત્રશોભિતકન્ધરા ॥ ૧૨॥

કનકાઙ્ગદકેયૂરકમનીયભુજાન્વિતા ।
રત્નગ્રૈવેયચિન્તાકલોલમુક્તાફલાન્વિતા ॥ ૧૩॥

કામેશ્વરપ્રેમરત્નમણિપ્રતિપણસ્તની ।
નાભ્યાલવાલરોમાલિલતાફલકુચદ્વયી ॥ ૧૪॥

લક્ષ્યરોમલતાધારતાસમુન્નેયમધ્યમા ।
સ્તનભારદલન્મધ્યપટ્ટબન્ધવલિત્રયા ॥ ૧૫॥

અરુણારુણકૌસુમ્ભવસ્ત્રભાસ્વત્કટીતટી ।
રત્નકિઙ્કિણિકારમ્યરશનાદામભૂષિતા ॥ ૧૬॥

કામેશજ્ઞાતસૌભાગ્યમાર્દવોરુદ્વયાન્વિતા ।
માણિક્યમુકુટાકારજાનુદ્વયવિરાજિતા ॥ ૧૭॥

ઇન્દ્રગોપપરિક્ષિપ્તસ્મરતૂણાભજઙ્ઘિકા ।
ગૂઢગુલ્ફા કૂર્મપૃષ્ઠજયિષ્ણુપ્રપદાન્વિતા ॥ ૧૮॥

નખદીધિતિસઞ્છન્નનમજ્જનતમોગુણા ।
પદદ્વયપ્રભાજાલપરાકૃતસરોરુહા ॥ ૧૯॥

સિઞ્જાનમણિમઞ્જીરમણ્ડિતશ્રીપદામ્બુજા । શિઞ્જાન
મરાલીમન્દગમના મહાલાવણ્યશેવધિઃ ॥ ૨૦॥

સર્વારુણાઽનવદ્યાઙ્ગી સર્વાભરણભૂષિતા ।
શિવકામેશ્વરાઙ્કસ્થા શિવા સ્વાધીનવલ્લભા ॥ ૨૧॥

સુમેરુમધ્યશૃઙ્ગસ્થા શ્રીમન્નગરનાયિકા ।
ચિન્તામણિગૃહાન્તસ્થા પઞ્ચબ્રહ્માસનસ્થિતા ॥ ૨૨॥

મહાપદ્માટવીસંસ્થા કદમ્બવનવાસિની ।
સુધાસાગરમધ્યસ્થા કામાક્ષી કામદાયિની ॥ ૨૩॥

દેવર્ષિગણસઙ્ઘાતસ્તૂયમાનાત્મવૈભવા ।
ભણ્ડાસુરવધોદ્યુક્તશક્તિસેનાસમન્વિતા ॥ ૨૪॥

સમ્પત્કરીસમારૂઢસિન્ધુરવ્રજસેવિતા ।
અશ્વારૂઢાધિષ્ઠિતાશ્વકોટિકોટિભિરાવૃતા ॥ ૨૫॥

ચક્રરાજરથારૂઢસર્વાયુધપરિષ્કૃતા ।
ગેયચક્રરથારૂઢમન્ત્રિણીપરિસેવિતા ॥ ૨૬॥

કિરિચક્રરથારૂઢદણ્ડનાથાપુરસ્કૃતા ।
જ્વાલામાલિનિકાક્ષિપ્તવહ્નિપ્રાકારમધ્યગા ॥ ૨૭॥

ભણ્ડસૈન્યવધોદ્યુક્તશક્તિવિક્રમહર્ષિતા ।
નિત્યાપરાક્રમાટોપનિરીક્ષણસમુત્સુકા ॥ ૨૮॥

ભણ્ડપુત્રવધોદ્યુક્તબાલાવિક્રમનન્દિતા ।
મન્ત્રિણ્યમ્બાવિરચિતવિષઙ્ગવધતોષિતા ॥ ૨૯॥ (વિશુક્રવધતોષિતા)
(See a note at the end)

વિશુક્રપ્રાણહરણવારાહીવીર્યનન્દિતા । (વિષઙ્ગપ્રાણહરણ)

કામેશ્વરમુખાલોકકલ્પિતશ્રીગણેશ્વરા ॥ ૩૦॥

મહાગણેશનિર્ભિન્નવિઘ્નયન્ત્રપ્રહર્ષિતા ।
ભણ્ડાસુરેન્દ્રનિર્મુક્તશસ્ત્રપ્રત્યસ્ત્રવર્ષિણી ॥ ૩૧॥

કરાઙ્ગુલિનખોત્પન્નનારાયણદશાકૃતિઃ ।
મહાપાશુપતાસ્ત્રાગ્નિનિર્દગ્ધાસુરસૈનિકા ॥ ૩૨॥

કામેશ્વરાસ્ત્રનિર્દગ્ધસભણ્ડાસુરશૂન્યકા ।
બ્રહ્મોપેન્દ્રમહેન્દ્રાદિદેવસંસ્તુતવૈભવા ॥ ૩૩॥

હરનેત્રાગ્નિસન્દગ્ધકામસઞ્જીવનૌષધિઃ ।
શ્રીમદ્વાગ્ભવકૂટૈકસ્વરૂપમુખપઙ્કજા ॥ ૩૪॥

કણ્ઠાધઃકટિપર્યન્તમધ્યકૂટસ્વરૂપિણી ।
શક્તિકૂટૈકતાપન્નકટ્યધોભાગધારિણી ॥ ૩૫॥

મૂલમન્ત્રાત્મિકા મૂલકૂટત્રયકલેવરા ।
કુલામૃતૈકરસિકા કુલસઙ્કેતપાલિની ॥ ૩૬॥

કુલાઙ્ગના કુલાન્તસ્થા કૌલિની કુલયોગિની ।
અકુલા સમયાન્તસ્થા સમયાચારતત્પરા ॥ ૩૭॥

મૂલાધારૈકનિલયા બ્રહ્મગ્રન્થિવિભેદિની ।

(તૃતીયા ધૂમ્રિકા કલા ૧૦૧-૨૦૦ નામાનિ)
મણિપૂરાન્તરુદિતા વિષ્ણુગ્રન્થિવિભેદિની ॥ ૩૮॥

આજ્ઞાચક્રાન્તરાલસ્થા રુદ્રગ્રન્થિવિભેદિની ।
સહસ્રારામ્બુજારૂઢા સુધાસારાભિવર્ષિણી ॥ ૩૯॥

તડિલ્લતાસમરુચિઃ ષટ્ચક્રોપરિસંસ્થિતા ।
મહાસક્તિઃ કુણ્ડલિની બિસતન્તુતનીયસી ॥ ૪૦॥

ભવાની ભાવનાગમ્યા ભવારણ્યકુઠારિકા ।
ભદ્રપ્રિયા ભદ્રમૂર્તિર્ભક્તસૌભાગ્યદાયિની ॥ ૪૧॥

ભક્તિપ્રિયા ભક્તિગમ્યા ભક્તિવશ્યા ભયાપહા ।
શામ્ભવી શારદારાધ્યા શર્વાણી શર્મદાયિની ॥ ૪૨॥

શાઙ્કરી શ્રીકરી સાધ્વી શરચ્ચન્દ્રનિભાનના ।

શાતોદરી શાન્તિમતી નિરાધારા નિરઞ્જના ॥ ૪૩॥

નિર્લેપા નિર્મલા નિત્યા નિરાકારા નિરાકુલા ।
નિર્ગુણા નિષ્કલા શાન્તા નિષ્કામા નિરુપપ્લવા ॥ ૪૪॥

નિત્યમુક્તા નિર્વિકારા નિષ્પ્રપઞ્ચા નિરાશ્રયા ।
નિત્યશુદ્ધા નિત્યબુદ્ધા નિરવદ્યા નિરન્તરા ॥ ૪૫॥

નિષ્કારણા નિષ્કલઙ્કા નિરુપાધિર્નિરીશ્વરા ।
નીરાગા રાગમથની નિર્મદા મદનાશિની ॥ ૪૬॥

નિશ્ચિન્તા નિરહઙ્કારા નિર્મોહા મોહનાશિની ।
નિર્મમા મમતાહન્ત્રી નિષ્પાપા પાપનાશિની ॥ ૪૭॥

નિષ્ક્રોધા ક્રોધશમની નિર્લોભા લોભનાશિની ।
નિઃસંશયા સંશયઘ્ની નિર્ભવા ભવનાશિની ॥ ૪૮॥ નિસ્સંશયા

નિર્વિકલ્પા નિરાબાધા નિર્ભેદા ભેદનાશિની ।
નિર્નાશા મૃત્યુમથની નિષ્ક્રિયા નિષ્પરિગ્રહા ॥ ૪૯॥

નિસ્તુલા નીલચિકુરા નિરપાયા નિરત્યયા ।
દુર્લભા દુર્ગમા દુર્ગા દુઃખહન્ત્રી સુખપ્રદા ॥ ૫૦॥

દુષ્ટદૂરા દુરાચારશમની દોષવર્જિતા ।
સર્વજ્ઞા સાન્દ્રકરુણા સમાનાધિકવર્જિતા ॥ ૫૧॥

(ચતુર્થી મરીચ્યાખ્યા કલા ૨૦૧-૩૦૦ નામાનિ)
સર્વશક્તિમયી સર્વમઙ્ગલા સદ્ગતિપ્રદા ।
સર્વેશ્વરી સર્વમયી સર્વમન્ત્રસ્વરૂપિણી ॥ ૫૨॥

સર્વયન્ત્રાત્મિકા સર્વતન્ત્રરૂપા મનોન્મની ।
માહેશ્વરી મહાદેવી મહાલક્ષ્મીર્મૃડપ્રિયા ॥ ૫૩॥

મહારૂપા મહાપૂજ્યા મહાપાતકનાશિની ।
મહામાયા મહાસત્ત્વા મહાશક્તિર્મહારતિઃ ॥ ૫૪॥

મહાભોગા મહૈશ્વર્યા મહાવીર્યા મહાબલા ।
મહાબુદ્ધિર્મહાસિદ્ધિર્મહાયોગેશ્વરેશ્વરી ॥ ૫૫॥

મહાતન્ત્રા મહામન્ત્રા મહાયન્ત્રા મહાસના ।
મહાયાગક્રમારાધ્યા મહાભૈરવપૂજિતા ॥ ૫૬॥

મહેશ્વરમહાકલ્પમહાતાણ્ડવસાક્ષિણી ।
મહાકામેશમહિષી મહાત્રિપુરસુન્દરી ॥ ૫૭॥

ચતુઃષષ્ટ્યુપચારાઢ્યા ચતુઃષષ્ટિકલામયી ।
મહાચતુઃષષ્ટિકોટિયોગિનીગણસેવિતા ॥ ૫૮॥

મનુવિદ્યા ચન્દ્રવિદ્યા ચન્દ્રમણ્ડલમધ્યગા ।
ચારુરૂપા ચારુહાસા ચારુચન્દ્રકલાધરા ॥ ૫૯॥

ચરાચરજગન્નાથા ચક્રરાજનિકેતના ।
પાર્વતી પદ્મનયના પદ્મરાગસમપ્રભા ॥ ૬૦॥

પઞ્ચપ્રેતાસનાસીના પઞ્ચબ્રહ્મસ્વરૂપિણી ।
ચિન્મયી પરમાનન્દા વિજ્ઞાનઘનરૂપિણી ॥ ૬૧॥

ધ્યાનધ્યાતૃધ્યેયરૂપા ધર્માધર્મવિવર્જિતા ।
વિશ્વરૂપા જાગરિણી સ્વપન્તી તૈજસાત્મિકા ॥ ૬૨॥

સુપ્તા પ્રાજ્ઞાત્મિકા તુર્યા સર્વાવસ્થાવિવર્જિતા ।
સૃષ્ટિકર્ત્રી બ્રહ્મરૂપા ગોપ્ત્રી ગોવિન્દરૂપિણી ॥ ૬૩॥

સંહારિણી રુદ્રરૂપા તિરોધાનકરીશ્વરી ।
સદાશિવાઽનુગ્રહદા પઞ્ચકૃત્યપરાયણા ॥ ૬૪॥

ભાનુમણ્ડલમધ્યસ્થા ભૈરવી ભગમાલિની ।
પદ્માસના ભગવતી પદ્મનાભસહોદરી ॥ ૬૫॥

ઉન્મેષનિમિષોત્પન્નવિપન્નભુવનાવલી ।
સહસ્રશીર્ષવદના સહસ્રાક્ષી સહસ્રપાત્ ॥ ૬૬॥

આબ્રહ્મકીટજનની વર્ણાશ્રમવિધાયિની ।
નિજાજ્ઞારૂપનિગમા પુણ્યાપુણ્યફલપ્રદા ॥ ૬૭॥

શ્રુતિસીમન્તસિન્દૂરીકૃતપાદાબ્જધૂલિકા ।
સકલાગમસન્દોહશુક્તિસમ્પુટમૌક્તિકા ॥ ૬૮॥

પુરુષાર્થપ્રદા પૂર્ણા ભોગિની ભુવનેશ્વરી ।
અમ્બિકાઽનાદિનિધના હરિબ્રહ્મેન્દ્રસેવિતા ॥ ૬૯॥

નારાયણી નાદરૂપા નામરૂપવિવર્જિતા ।

(પઞ્ચમી જ્વાલિની કલા ૩૦૧-૪૦૦ નામાનિ)
હ્રીઙ્કારી હ્રીમતી હૃદ્યા હેયોપાદેયવર્જિતા ॥ ૭૦॥

રાજરાજાર્ચિતા રાજ્ઞી રમ્યા રાજીવલોચના ।
રઞ્જની રમણી રસ્યા રણત્કિઙ્કિણિમેખલા ॥ ૭૧॥

રમા રાકેન્દુવદના રતિરૂપા રતિપ્રિયા ।
રક્ષાકરી રાક્ષસઘ્ની રામા રમણલમ્પટા ॥ ૭૨॥

કામ્યા કામકલારૂપા કદમ્બકુસુમપ્રિયા ।
કલ્યાણી જગતીકન્દા કરુણારસસાગરા ॥ ૭૩॥

કલાવતી કલાલાપા કાન્તા કાદમ્બરીપ્રિયા ।
વરદા વામનયના વારુણીમદવિહ્વલા ॥ ૭૪॥

વિશ્વાધિકા વેદવેદ્યા વિન્ધ્યાચલનિવાસિની ।
વિધાત્રી વેદજનની વિષ્ણુમાયા વિલાસિની ॥ ૭૫॥

ક્ષેત્રસ્વરૂપા ક્ષેત્રેશી ક્ષેત્રક્ષેત્રજ્ઞપાલિની ।
ક્ષયવૃદ્ધિવિનિર્મુક્તા ક્ષેત્રપાલસમર્ચિતા ॥ ૭૬॥

વિજયા વિમલા વન્દ્યા વન્દારુજનવત્સલા ।
વાગ્વાદિની વામકેશી વહ્નિમણ્ડલવાસિની ॥ ૭૭॥

ભક્તિમત્કલ્પલતિકા પશુપાશવિમોચિની ।
સંહૃતાશેષપાષણ્ડા સદાચારપ્રવર્તિકા ॥ ૭૮॥ પાખણ્ડા

તાપત્રયાગ્નિસન્તપ્તસમાહ્લાદનચન્દ્રિકા ।
તરુણી તાપસારાધ્યા તનુમધ્યા તમોઽપહા ॥ ૭૯॥

ચિતિસ્તત્પદલક્ષ્યાર્થા ચિદેકરસરૂપિણી ।
સ્વાત્માનન્દલવીભૂતબ્રહ્માદ્યાનન્દસન્તતિઃ ॥ ૮૦॥

પરા પ્રત્યક્ચિતીરૂપા પશ્યન્તી પરદેવતા ।
મધ્યમા વૈખરીરૂપા ભક્તમાનસહંસિકા ॥ ૮૧॥

કામેશ્વરપ્રાણનાડી કૃતજ્ઞા કામપૂજિતા ।
શૃઙ્ગારરસસમ્પૂર્ણા જયા જાલન્ધરસ્થિતા ॥ ૮૨॥

ઓડ્યાણપીઠનિલયા બિન્દુમણ્ડલવાસિની ।

રહોયાગક્રમારાધ્યા રહસ્તર્પણતર્પિતા ॥ ૮૩॥

સદ્યઃપ્રસાદિની વિશ્વસાક્ષિણી સાક્ષિવર્જિતા ।
ષડઙ્ગદેવતાયુક્તા ષાડ્ગુણ્યપરિપૂરિતા ॥ ૮૪॥

નિત્યક્લિન્ના નિરુપમા નિર્વાણસુખદાયિની ।
નિત્યાષોડશિકારૂપા શ્રીકણ્ઠાર્ધશરીરિણી ॥ ૮૫॥

પ્રભાવતી પ્રભારૂપા પ્રસિદ્ધા પરમેશ્વરી ।
મૂલપ્રકૃતિરવ્યક્તા વ્યક્તાવ્યક્તસ્વરૂપિણી ॥ ૮૬॥

(ષષ્ઠી રુચ્યાખ્યા કલા ૪૦૧-૫૦૦ નામાનિ)
વ્યાપિની વિવિધાકારા વિદ્યાવિદ્યા-સ્વરૂપિણી ।
મહાકામેશનયનકુમુદાહ્લાદકૌમુદી ॥ ૮૭॥

ભક્તહાર્દતમોભેદભાનુમદ્ભાનુસન્તતિઃ ।
શિવદૂતી શિવારાધ્યા શિવમૂર્તિઃ શિવઙ્કરી ॥ ૮૮॥

શિવપ્રિયા શિવપરા શિષ્ટેષ્ટા શિષ્ટપૂજિતા ।
અપ્રમેયા સ્વપ્રકાશા મનોવાચામગોચરા ॥ ૮૯॥

ચિચ્છક્તિશ્ ચેતનારૂપા જડશક્તિર્જડાત્મિકા ।
ગાયત્રી વ્યાહૃતિઃ સન્ધ્યા દ્વિજવૃન્દનિષેવિતા ॥ ૯૦॥

તત્ત્વાસના તત્ત્વમયી પઞ્ચકોશાન્તરસ્થિતા ।
નિઃસીમમહિમા નિત્યયૌવના મદશાલિની ॥ ૯૧॥ નિસ્સીમ

મદઘૂર્ણિતરક્તાક્ષી મદપાટલગણ્ડભૂઃ ।
ચન્દનદ્રવદિગ્ધાઙ્ગી ચામ્પેયકુસુમપ્રિયા ॥ ૯૨॥

કુશલા કોમલાકારા કુરુકુલ્લા કુલેશ્વરી ।
કુલકુણ્ડાલયા કૌલમાર્ગતત્પરસેવિતા ॥ ૯૩॥

કુમારગણનાથામ્બા તુષ્ટિઃ પુષ્ટિર્મતિર્ધૃતિઃ ।
શાન્તિઃ સ્વસ્તિમતી કાન્તિર્નન્દિની વિઘ્નનાશિની ॥ ૯૪॥

તેજોવતી ત્રિનયના લોલાક્ષીકામરૂપિણી ।
માલિની હંસિની માતા મલયાચલવાસિની ॥ ૯૫॥

સુમુખી નલિની સુભ્રૂઃ શોભના સુરનાયિકા ।
કાલકણ્ઠી કાન્તિમતી ક્ષોભિણી સૂક્ષ્મરૂપિણી ॥ ૯૬॥

વજ્રેશ્વરી વામદેવી વયોઽવસ્થાવિવર્જિતા ।
સિદ્ધેશ્વરી સિદ્ધવિદ્યા સિદ્ધમાતા યશસ્વિની ॥ ૯૭॥

વિશુદ્ધિચક્રનિલયાઽઽરક્તવર્ણા ત્રિલોચના ।
ખટ્વાઙ્ગાદિપ્રહરણા વદનૈકસમન્વિતા ॥ ૯૮॥

પાયસાન્નપ્રિયા ત્વક્સ્થા પશુલોકભયઙ્કરી ।
અમૃતાદિમહાશક્તિસંવૃતા ડાકિનીશ્વરી ॥ ૯૯॥

અનાહતાબ્જનિલયા શ્યામાભા વદનદ્વયા ।
દંષ્ટ્રોજ્જ્વલાઽક્ષમાલાદિધરા રુધિરસંસ્થિતા ॥ ૧૦૦॥

કાલરાત્ર્યાદિશક્ત્યૌઘવૃતા સ્નિગ્ધૌદનપ્રિયા ।
મહાવીરેન્દ્રવરદા રાકિણ્યમ્બાસ્વરૂપિણી ॥ ૧૦૧॥

મણિપૂરાબ્જનિલયા વદનત્રયસંયુતા ।
વજ્રાદિકાયુધોપેતા ડામર્યાદિભિરાવૃતા ॥ ૧૦૨॥

(સપ્તમી સુષુમ્ણા કલા ૫૦૧-૬૦૦ નામાનિ)
રક્તવર્ણા માંસનિષ્ઠા ગુડાન્નપ્રીતમાનસા ।
સમસ્તભક્તસુખદા લાકિન્યમ્બાસ્વરૂપિણી ॥ ૧૦૩॥

સ્વાધિષ્ઠાનામ્બુજગતા ચતુર્વક્ત્રમનોહરા ।
શૂલાદ્યાયુધસમ્પન્ના પીતવર્ણાઽતિગર્વિતા ॥ ૧૦૪॥

મેદોનિષ્ઠા મધુપ્રીતા બન્ધિન્યાદિસમન્વિતા ।
દધ્યન્નાસક્તહૃદયા કાકિનીરૂપધારિણી ॥ ૧૦૫॥

મૂલાધારામ્બુજારૂઢા પઞ્ચવક્ત્રાઽસ્થિસંસ્થિતા ।
અઙ્કુશાદિપ્રહરણા વરદાદિનિષેવિતા ॥ ૧૦૬॥

મુદ્ગૌદનાસક્તચિત્તા સાકિન્યમ્બાસ્વરૂપિણી ।
આજ્ઞાચક્રાબ્જનિલયા શુક્લવર્ણા ષડાનના ॥ ૧૦૭॥

મજ્જાસંસ્થા હંસવતીમુખ્યશક્તિસમન્વિતા ।
હરિદ્રાન્નૈકરસિકા હાકિનીરૂપધારિણી ॥ ૧૦૮॥

સહસ્રદલપદ્મસ્થા સર્વવર્ણોપશોભિતા ।
સર્વાયુધધરા શુક્લસંસ્થિતા સર્વતોમુખી ॥ ૧૦૯॥

સર્વૌદનપ્રીતચિત્તા યાકિન્યમ્બાસ્વરૂપિણી ।
સ્વાહા સ્વધાઽમતિર્મેધા શ્રુતિઃ સ્મૃતિરનુત્તમા ॥ ૧૧૦॥

પુણ્યકીર્તિઃ પુણ્યલભ્યા પુણ્યશ્રવણકીર્તના ।
પુલોમજાર્ચિતા બન્ધમોચની બન્ધુરાલકા ॥ ૧૧૧॥ મોચની બર્બરાલકા

વિમર્શરૂપિણી વિદ્યા વિયદાદિજગત્પ્રસૂઃ ।
સર્વવ્યાધિપ્રશમની સર્વમૃત્યુનિવારિણી ॥ ૧૧૨॥

અગ્રગણ્યાઽચિન્ત્યરૂપા કલિકલ્મષનાશિની ।
કાત્યાયની કાલહન્ત્રી કમલાક્ષનિષેવિતા ॥ ૧૧૩॥

તામ્બૂલપૂરિતમુખી દાડિમીકુસુમપ્રભા ।
મૃગાક્ષી મોહિની મુખ્યા મૃડાની મિત્રરૂપિણી ॥ ૧૧૪॥

નિત્યતૃપ્તા ભક્તનિધિર્નિયન્ત્રી નિખિલેશ્વરી ।
મૈત્ર્યાદિવાસનાલભ્યા મહાપ્રલયસાક્ષિણી ॥ ૧૧૫॥

પરા શક્તિઃ પરા નિષ્ઠા પ્રજ્ઞાનઘનરૂપિણી ।
માધ્વીપાનાલસા મત્તા માતૃકાવર્ણરૂપિણી ॥ ૧૧૬॥

મહાકૈલાસનિલયા મૃણાલમૃદુદોર્લતા ।
મહનીયા દયામૂર્તિર્મહાસામ્રાજ્યશાલિની ॥ ૧૧૭॥

આત્મવિદ્યા મહાવિદ્યા શ્રીવિદ્યા કામસેવિતા ।
શ્રીષોડશાક્ષરીવિદ્યા ત્રિકૂટા કામકોટિકા ॥ ૧૧૮॥

કટાક્ષકિઙ્કરીભૂતકમલાકોટિસેવિતા ।
શિરઃસ્થિતા ચન્દ્રનિભા ભાલસ્થેન્દ્રધનુઃપ્રભા ॥ ૧૧૯॥

હૃદયસ્થા રવિપ્રખ્યા ત્રિકોણાન્તરદીપિકા ।
દાક્ષાયણી દૈત્યહન્ત્રી દક્ષયજ્ઞવિનાશિની ॥ ૧૨૦॥

(અષ્ટમી ભોગદા કલા ૬૦૧-૭૦૦ નામાનિ)
દરાન્દોલિતદીર્ઘાક્ષી દરહાસોજ્જ્વલન્મુખી ।
ગુરુમૂર્તિર્ગુણનિધિર્ગોમાતા ગુહજન્મભૂઃ ॥ ૧૨૧॥

દેવેશી દણ્ડનીતિસ્થા દહરાકાશરૂપિણી ।
પ્રતિપન્મુખ્યરાકાન્તતિથિમણ્ડલપૂજિતા ॥ ૧૨૨॥

કલાત્મિકા કલાનાથા કાવ્યાલાપવિનોદિની । વિમોદિની

સચામરરમાવાણીસવ્યદક્ષિણસેવિતા ॥ ૧૨૩॥

આદિશક્તિરમેયાઽઽત્મા પરમા પાવનાકૃતિઃ ।
અનેકકોટિબ્રહ્માણ્ડજનની દિવ્યવિગ્રહા ॥ ૧૨૪॥

ક્લીઙ્કારી કેવલા ગુહ્યા કૈવલ્યપદદાયિની ।
ત્રિપુરા ત્રિજગદ્વન્દ્યા ત્રિમૂર્તિસ્ત્રિદશેશ્વરી ॥ ૧૨૫॥

ત્ર્યક્ષરી દિવ્યગન્ધાઢ્યા સિન્દૂરતિલકાઞ્ચિતા ।
ઉમા શૈલેન્દ્રતનયા ગૌરી ગન્ધર્વસેવિતા ॥ ૧૨૬॥

વિશ્વગર્ભા સ્વર્ણગર્ભાઽવરદા વાગધીશ્વરી ।
ધ્યાનગમ્યાઽપરિચ્છેદ્યા જ્ઞાનદા જ્ઞાનવિગ્રહા ॥ ૧૨૭॥

સર્વવેદાન્તસંવેદ્યા સત્યાનન્દસ્વરૂપિણી ।
લોપામુદ્રાર્ચિતા લીલાક્લૃપ્તબ્રહ્માણ્ડમણ્ડલા ॥ ૧૨૮॥

અદૃશ્યા દૃશ્યરહિતા વિજ્ઞાત્રી વેદ્યવર્જિતા ।
યોગિની યોગદા યોગ્યા યોગાનન્દા યુગન્ધરા ॥ ૧૨૯॥

ઇચ્છાશક્તિજ્ઞાનશક્તિક્રિયાશક્તિસ્વરૂપિણી ।
સર્વાધારા સુપ્રતિષ્ઠા સદસદ્રૂપધારિણી ॥ ૧૩૦॥

અષ્ટમૂર્તિરજાજૈત્રી લોકયાત્રાવિધાયિની । અજાજેત્રી
એકાકિની ભૂમરૂપા નિર્દ્વૈતા દ્વૈતવર્જિતા ॥ ૧૩૧॥

અન્નદા વસુદા વૃદ્ધા બ્રહ્માત્મૈક્યસ્વરૂપિણી ।
બૃહતી બ્રાહ્મણી બ્રાહ્મી બ્રહ્માનન્દા બલિપ્રિયા ॥ ૧૩૨॥

ભાષારૂપા બૃહત્સેના ભાવાભાવવિવર્જિતા ।
સુખારાધ્યા શુભકરી શોભના સુલભા ગતિઃ ॥ ૧૩૩॥

રાજરાજેશ્વરી રાજ્યદાયિની રાજ્યવલ્લભા ।
રાજત્કૃપા રાજપીઠનિવેશિતનિજાશ્રિતા ॥ ૧૩૪॥

રાજ્યલક્ષ્મીઃ કોશનાથા ચતુરઙ્ગબલેશ્વરી ।
સામ્રાજ્યદાયિની સત્યસન્ધા સાગરમેખલા ॥ ૧૩૫॥

દીક્ષિતા દૈત્યશમની સર્વલોકવશઙ્કરી ।
સર્વાર્થદાત્રી સાવિત્રી સચ્ચિદાનન્દરૂપિણી ॥ ૧૩૬॥

(નવમી વિશ્વા કલા ૭૦૧-૮૦૦ નામાનિ)
દેશકાલાપરિચ્છિન્ના સર્વગા સર્વમોહિની ।
સરસ્વતી શાસ્ત્રમયી ગુહામ્બા ગુહ્યરૂપિણી ॥ ૧૩૭॥

સર્વોપાધિવિનિર્મુક્તા સદાશિવપતિવ્રતા ।
સમ્પ્રદાયેશ્વરી સાધ્વી ગુરુમણ્ડલરૂપિણી ॥ ૧૩૮॥

કુલોત્તીર્ણા ભગારાધ્યા માયા મધુમતી મહી ।
ગણામ્બા ગુહ્યકારાધ્યા કોમલાઙ્ગી ગુરુપ્રિયા ॥ ૧૩૯॥

સ્વતન્ત્રા સર્વતન્ત્રેશી દક્ષિણામૂર્તિરૂપિણી ।
સનકાદિસમારાધ્યા શિવજ્ઞાનપ્રદાયિની ॥ ૧૪૦॥

ચિત્કલાऽऽનન્દકલિકા પ્રેમરૂપા પ્રિયઙ્કરી ।
નામપારાયણપ્રીતા નન્દિવિદ્યા નટેશ્વરી ॥ ૧૪૧॥

મિથ્યાજગદધિષ્ઠાના મુક્તિદા મુક્તિરૂપિણી ।
લાસ્યપ્રિયા લયકરી લજ્જા રમ્ભાદિવન્દિતા ॥ ૧૪૨॥

ભવદાવસુધાવૃષ્ટિઃ પાપારણ્યદવાનલા ।
દૌર્ભાગ્યતૂલવાતૂલા જરાધ્વાન્તરવિપ્રભા ॥ ૧૪૩॥

ભાગ્યાબ્ધિચન્દ્રિકા ભક્તચિત્તકેકિઘનાઘના ।
રોગપર્વતદમ્ભોલિર્મૃત્યુદારુકુઠારિકા ॥ ૧૪૪॥

મહેશ્વરી મહાકાલી મહાગ્રાસા મહાશના ।
અપર્ણા ચણ્ડિકા ચણ્ડમુણ્ડાસુરનિષૂદિની ॥ ૧૪૫॥

ક્ષરાક્ષરાત્મિકા સર્વલોકેશી વિશ્વધારિણી ।
ત્રિવર્ગદાત્રી સુભગા ત્ર્યમ્બકા ત્રિગુણાત્મિકા ॥ ૧૪૬॥

સ્વર્ગાપવર્ગદા શુદ્ધા જપાપુષ્પનિભાકૃતિઃ ।
ઓજોવતી દ્યુતિધરા યજ્ઞરૂપા પ્રિયવ્રતા ॥ ૧૪૭॥

દુરારાધ્યા દુરાધર્ષા પાટલીકુસુમપ્રિયા ।
મહતી મેરુનિલયા મન્દારકુસુમપ્રિયા ॥ ૧૪૮॥

વીરારાધ્યા વિરાડ્રૂપા વિરજા વિશ્વતોમુખી ।
પ્રત્યગ્રૂપા પરાકાશા પ્રાણદા પ્રાણરૂપિણી ॥ ૧૪૯॥

માર્તાણ્ડભૈરવારાધ્યા મન્ત્રિણીન્યસ્તરાજ્યધૂઃ । માર્તણ્ડ

ત્રિપુરેશી જયત્સેના નિસ્ત્રૈગુણ્યા પરાપરા ॥ ૧૫૦॥

સત્યજ્ઞાનાનન્દરૂપા સામરસ્યપરાયણા ।
કપર્દિની કલામાલા કામધુક્ કામરૂપિણી ॥ ૧૫૧॥

કલાનિધિઃ કાવ્યકલા રસજ્ઞા રસશેવધિઃ ।

(દશમી બોધિની કલા ૮૦૧-૯૦૦ નામાનિ)
પુષ્ટા પુરાતના પૂજ્યા પુષ્કરા પુષ્કરેક્ષણા ॥ ૧૫૨॥

પરઞ્જ્યોતિઃ પરન્ધામ પરમાણુઃ પરાત્પરા ।
પાશહસ્તા પાશહન્ત્રી પરમન્ત્રવિભેદિની ॥ ૧૫૩॥

મૂર્તાઽમૂર્તાઽનિત્યતૃપ્તા મુનિમાનસહંસિકા ।
સત્યવ્રતા સત્યરૂપા સર્વાન્તર્યામિની સતી ॥ ૧૫૪॥

બ્રહ્માણી બ્રહ્મજનની બહુરૂપા બુધાર્ચિતા ।
પ્રસવિત્રી પ્રચણ્ડાઽઽજ્ઞા પ્રતિષ્ઠા પ્રકટાકૃતિઃ ॥ ૧૫૫॥

પ્રાણેશ્વરી પ્રાણદાત્રી પઞ્ચાશત્પીઠરૂપિણી ।
વિશૃઙ્ખલા વિવિક્તસ્થા વીરમાતા વિયત્પ્રસૂઃ ॥ ૧૫૬॥

મુકુન્દા મુક્તિનિલયા મૂલવિગ્રહરૂપિણી ।
ભાવજ્ઞા ભવરોગઘ્ની ભવચક્રપ્રવર્તિની ॥ ૧૫૭॥

છન્દઃસારા શાસ્ત્રસારા મન્ત્રસારા તલોદરી ।
ઉદારકીર્તિરુદ્દામવૈભવા વર્ણરૂપિણી ॥ ૧૫૮॥

જન્મમૃત્યુજરાતપ્તજનવિશ્રાન્તિદાયિની ।
સર્વોપનિષદુદ્ઘુષ્ટા શાન્ત્યતીતકલાત્મિકા ॥ ૧૫૯॥

ગમ્ભીરા ગગનાન્તસ્થા ગર્વિતા ગાનલોલુપા ।
કલ્પનારહિતા કાષ્ઠાઽકાન્તા કાન્તાર્ધવિગ્રહા ॥ ૧૬૦॥

કાર્યકારણનિર્મુક્તા કામકેલિતરઙ્ગિતા ।
કનત્કનકતાટઙ્કા લીલાવિગ્રહધારિણી ॥ ૧૬૧॥

અજા ક્ષયવિનિર્મુક્તા મુગ્ધા ક્ષિપ્રપ્રસાદિની ।
અન્તર્મુખસમારાધ્યા બહિર્મુખસુદુર્લભા ॥ ૧૬૨॥

ત્રયી ત્રિવર્ગનિલયા ત્રિસ્થા ત્રિપુરમાલિની ।

નિરામયા નિરાલમ્બા સ્વાત્મારામા સુધાસૃતિઃ ॥ ૧૬૩ ॥ સુધાસ્રુતિઃ

સંસારપઙ્કનિર્મગ્નસમુદ્ધરણપણ્ડિતા ।
યજ્ઞપ્રિયા યજ્ઞકર્ત્રી યજમાનસ્વરૂપિણી ॥ ૧૬૪ ॥

ધર્માધારા ધનાધ્યક્ષા ધનધાન્યવિવર્ધિની ।
વિપ્રપ્રિયા વિપ્રરૂપા વિશ્વભ્રમણકારિણી ॥ ૧૬૫ ॥

વિશ્વગ્રાસા વિદ્રુમાભા વૈષ્ણવી વિષ્ણુરૂપિણી ।
અયોનિર્યોનિનિલયા કૂટસ્થા કુલરૂપિણી ॥ ૧૬૬ ॥

(એકાદશી ધારિણી કલા ૯૦૧-૧૦૦૦ નામાનિ)
વીરગોષ્ઠીપ્રિયા વીરા નૈષ્કર્મ્યા નાદરૂપિણી ।
વિજ્ઞાનકલના કલ્યા વિદગ્ધા બૈન્દવાસના ॥ ૧૬૭ ॥

તત્ત્વાધિકા તત્ત્વમયી તત્ત્વમર્થસ્વરૂપિણી ।
સામગાનપ્રિયા સૌમ્યા સદાશિવકુટુમ્બિની ॥ ૧૬૮ ॥ સોમ્યા

સવ્યાપસવ્યમાર્ગસ્થા સર્વાપદ્વિનિવારિણી ।
સ્વસ્થા સ્વભાવમધુરા ધીરા ધીરસમર્ચિતા ॥ ૧૬૯ ॥

ચૈતન્યાર્ઘ્યસમારાધ્યા ચૈતન્યકુસુમપ્રિયા ।
સદોદિતા સદાતુષ્ટા તરુણાદિત્યપાટલા ॥ ૧૭૦ ॥

દક્ષિણાદક્ષિણારાધ્યા દરસ્મેરમુખામ્બુજા ।
કૌલિનીકેવલાઽનર્ઘ્યકૈવલ્યપદદાયિની ॥ ૧૭૧ ॥

સ્તોત્રપ્રિયા સ્તુતિમતી શ્રુતિસંસ્તુતવૈભવા ।
મનસ્વિની માનવતી મહેશી મઙ્ગલાકૃતિઃ ॥ ૧૭૨ ॥

વિશ્વમાતા જગદ્ધાત્રી વિશાલાક્ષી વિરાગિણી ।
પ્રગલ્ભા પરમોદારા પરામોદા મનોમયી ॥ ૧૭૩ ॥

વ્યોમકેશી વિમાનસ્થા વજ્રિણી વામકેશ્વરી ।
પઞ્ચયજ્ઞપ્રિયા પઞ્ચપ્રેતમઞ્ચાધિશાયિની ॥ ૧૭૪ ॥

પઞ્ચમી પઞ્ચભૂતેશી પઞ્ચસઙ્ખ્યોપચારિણી ।
શાશ્વતી શાશ્વતૈશ્વર્યા શર્મદા શમ્ભુમોહિની ॥ ૧૭૫ ॥

ધરાધરસુતા ધન્યા ધર્મિણી ધર્મવર્ધિની ।
લોકાતીતા ગુણાતીતા સર્વાતીતા શમાત્મિકા ॥ ૧૭૬ ॥

બન્ધૂકકુસુમપ્રખ્યા બાલા લીલાવિનોદિની ।
સુમઙ્ગલી સુખકરી સુવેષાઢ્યા સુવાસિની ॥ ૧૭૭॥

સુવાસિન્યર્ચનપ્રીતાઽઽશોભના શુદ્ધમાનસા ।
બિન્દુતર્પણસન્તુષ્ટા પૂર્વજા ત્રિપુરામ્બિકા ॥ ૧૭૮॥

દશમુદ્રાસમારાધ્યા ત્રિપુરાશ્રીવશઙ્કરી ।
જ્ઞાનમુદ્રા જ્ઞાનગમ્યા જ્ઞાનજ્ઞેયસ્વરૂપિણી ॥ ૧૭૯॥

યોનિમુદ્રા ત્રિખણ્ડેશી ત્રિગુણામ્બા ત્રિકોણગા ।
અનઘાઽદ્ભુતચારિત્રા વાઞ્છિતાર્થપ્રદાયિની ॥ ૧૮૦॥

અભ્યાસાતિશયજ્ઞાતા ષડધ્વાતીતરૂપિણી ।
અવ્યાજકરુણામૂર્તિરજ્ઞાનધ્વાન્તદીપિકા ॥ ૧૮૧॥

આબાલગોપવિદિતા સર્વાનુલ્લઙ્ઘ્યશાસના ।
શ્રીચક્રરાજનિલયા શ્રીમત્ત્રિપુરસુન્દરી ॥ ૧૮૨॥

શ્રીશિવા શિવશક્ત્યૈક્યરૂપિણી લલિતામ્બિકા ।
એવં શ્રીલલિતા દેવ્યા નામ્નાં સાહસ્રકં જગુઃ ॥

॥ ઇતિ શ્રીબ્રહ્માણ્ડ પુરાણે ઉત્તરખણ્ડે શ્રીહયગ્રીવાગસ્ત્યસંવાદે
શ્રીલલિતાસહસ્રનામસ્તોત્રકથનં સમ્પૂર્ણમ્ ॥

---

ફલશ્રુતિઃ
(ક્ષમાખ્યા દ્વાદશી કલા)
ઇત્યેતન્નામસાહસ્રં કથિતં તે ઘટોદ્ભવ ।
રહસ્યાનાં રહસ્યં ચ લલિતાપ્રીતિદાયકમ્ ॥ ૧॥

અનેન સદૃશં સ્તોત્રં ન ભૂતં ન ભવિષ્યતિ ।
સર્વરોગપ્રશમનં સર્વસમ્પત્પ્રવર્ધનમ્ ॥ ૨॥

સર્વાપમૃત્યુશમનં કાલમૃત્યુનિવારણમ્ ।
સર્વજ્વરાર્તિશમનં દીર્ઘાયુષ્યપ્રદાયકમ્ ॥ ૩॥

પુત્રપ્રદમપુત્રાણાં પુરુષાર્થપ્રદાયકમ્ ।
ઇદં વિશેષાચ્છ્રીદેવ્યાઃ સ્તોત્રં પ્રીતિવિધાયકમ્ ॥ ૪॥

જપેન્નિત્યં પ્રયત્નેન લલિતોપાસ્તિતત્પરઃ ।
પ્રાતઃ સ્નાત્વા વિધાનેન સન્ધ્યાકર્મ સમાપ્ય ચ ॥ ૫॥

પૂજાગૃહં તતો ગત્વા ચક્રરાજં સમર્ચયેત્ ।
વિદ્યાં જપેત્ સહસ્રં વા ત્રિશતં શતમેવ વા ॥ ૬॥

રહસ્યનામસાહસ્રમિદં પશ્ચાત્પઠેન્નરઃ ।
જન્મમધ્યે સકૃચ્ચાપિ ય એતત્પઠતે સુધીઃ ॥ ૭॥

તસ્ય પુણ્યફલં વક્ષ્યે શૃણુ ત્વં કુમ્ભસમ્ભવ ।
ગઙ્ગાદિ સર્વતીર્થેષુ યઃ સ્નાયાત્કોટિજન્મસુ ॥ ૮॥

કોટિલિઙ્ગપ્રતિષ્ઠાં ચ યઃ કુર્યાદવિમુક્તકે ।
કુરુક્ષેત્રે તુ યો દદ્યાત્કોટિવારં રવિગ્રહે ॥ ૯॥

કોટિં સૌવર્ણભારાણાં શ્રોત્રિયેષુ દ્વિજન્મસુ ।
યઃ કોટિં હયમેધાનામાહરેદ્ ગાઙ્ગરોધસિ ॥ ૧૦॥

આચરેત્કૂપકોટીર્યો નિર્જલે મરુભૂતલે ।
દુર્ભિક્ષે યઃ પ્રતિદિનં કોટિબ્રાહ્મણભોજનમ્ ॥ ૧૧॥

શ્રદ્ધયા પરયા કુર્યાત્સહસ્રોપરિવત્સરાન્ ।
તત્પુણ્યં કોટિગુણિતં લભેત્પુણ્યમનુત્તમમ્ ॥ ૧૨॥

રહસ્યનામસાહસ્રે નામ્નોઽપ્યેકસ્ય કીર્તનાત્ ।
રહસ્યનામસાહસ્રે નામૈકમપિ યઃ પઠેત્ ॥ ૧૩॥

તસ્ય પાપાનિ નશ્યન્તિ મહાન્ત્યપિ ન સંશયઃ ।
નિત્યકર્માનનુષ્ઠાનાન્નિષિદ્ધકરણાદપિ ॥ ૧૪॥

યત્પાપં જાયતે પુંસાં તત્સર્વં નશ્યતિ ધ્રુવમ્ ।
બહુનાત્ર કિમુક્તેન શૃણુ ત્વં કુમ્ભસમ્ભવ ॥ ૧૫॥

અત્રૈકનામ્નો યા શક્તિઃ પાતકાનાં નિવર્તને ।
તન્નિવર્ત્યમઘં કર્તું નાલં લોકાશ્ચતુર્દશ ॥ ૧૬॥

યસ્ત્યક્ત્વા નામસાહસ્રં પાપહાનિમભીપ્સતિ ।
સ હિ શીતનિવૃત્યર્થં હિમશૈલે નિષેવતે ॥ ૧૭॥

ભક્તો યઃ કીર્તયેન્નિત્યમિદં નામસહસ્રકમ્ ।
તસ્મૈ શ્રીલિતાદેવી પ્રીતાઽભીષ્ટં પ્રયચ્છતિ ॥ ૧૮॥

અકીર્તયન્નિદં સ્તોત્રં કથં ભક્તો ભવિષ્યતિ ।
નિત્યં સઙ્કીર્તનાશક્તઃ કીર્તયેત્પુણ્યવાસરે ॥ ૧૯॥

સંક્રાન્તૌ વિષુવે ચૈવ સ્વજન્મત્રિતયેઽયને ।
નવમ્યાં વા ચતુર્દશ્યાં સિતાયાં શુક્રવાસરે ॥ ૨૦॥

કીર્તયેન્નામસાહસ્રં પૌર્ણમાસ્યાં વિશેષતઃ ।
પૌર્ણમાસ્યાં ચન્દ્રબિમ્બે ધ્યાત્વા શ્રીલલિતામ્બિકામ્ ॥ ૨૧॥

પઞ્ચોપચારૈઃ સમ્પૂજ્ય પઠેન્નામસહસ્રકમ્ ।
સર્વે રોગાઃ પ્રણશ્યન્તિ દીર્ઘમાયુશ્ચ વિન્દતિ ॥ ૨૨॥

અયમાયુષ્કરો નામ પ્રયોગઃ કલ્પચોદિતઃ ।
જ્વરાર્તં શિરસિ સ્પૃષ્ટ્વા પઠેન્નામસહસ્રકમ્ ॥ ૨૩॥

તત્ક્ષણાત્પ્રશમં યાતિ શિરસ્તોદો જ્વરોઽપિ ચ ।
સર્વવ્યાધિનિવૃત્ત્યર્થં સ્પૃષ્ટ્વા ભસ્મ જપેદિદમ્ ॥ ૨૪॥

તદ્ભસ્મધારણાદેવ નશ્યન્તિ વ્યાધયઃ ક્ષણાત્ ।
જલં સમ્મન્ત્ર્ય કુમ્ભસ્થં નામસાહસ્રતો મુને ॥ ૨૫॥

અભિષિઞ્ચેદ્ગ્રહગ્રસ્તાન્ગ્રહા નશ્યન્તિ તત્ક્ષણાત્ ।
સુધાસાગરમધ્યસ્થાં ધ્યાત્વા શ્રીલલિતામ્બિકામ્ ॥ ૨૬॥

યઃ પઠેન્નામસાહસ્રં વિષં તસ્ય વિનશ્યતિ ।
વન્ધ્યાનાં પુત્રલાભાય નામસાહસ્રમન્ત્રિતમ્ ॥ ૨૭॥

નવનીતં પ્રદદ્યાત્તુ પુત્રલાભો ભવેદ્ધ્રુવમ્ ।
દેવ્યાઃ પાશેન સમ્બદ્ધામાકૃષ્ટામઙ્કુશેન ચ ॥ ૨૮॥

ધ્યાત્વાઽભીષ્ટાં સ્ત્રિયં રાત્રૌ જપેન્નામસહસ્રકમ્ ।
આયાતિ સ્વસમીપં સા યદ્યપ્યન્તઃ પુરં ગતા ॥ ૨૯॥

રાજાકર્ષણકામશ્ચેદ્રાજાવસથદિઙ્મુખઃ ।
ત્રિરાત્રં યઃ પઠેદેતચ્છ્રીદેવીધ્યાનતત્પરઃ ॥ ૩૦॥

સ રાજા પારવશ્યેન તુરઙ્ગં વા મતઙ્ગજમ્ ।
આરુહ્યાયાતિ નિકટં દાસવત્પ્રણિપત્ય ચ ॥ ૩૧॥

તસ્મૈ રાજ્યં ચ કોશં ચ દદાત્યેવ વશં ગતઃ ।

રહસ્યનામસાહસ્રં યઃ કીર્તયતિ નિત્યશઃ ॥ ૩૨॥

તન્મુખાલોકમાત્રેણ મુહ્યેલ્લોકત્રયં મુને ।
યસ્ત્વિદં નામસાહસ્રં સકૃત્પઠતિ ભક્તિમાન્ ॥ ૩૩॥

તસ્ય યે શત્રવસ્તેષાં નિહન્તા શરભેશ્વરઃ ।
યો વાઽભિચારં કુરુતે નામસાહસ્રપાઠકે ॥ ૩૪॥

નિવર્ત્ય તત્ક્રિયાં હન્યાત્તં વૈ પ્રત્યઙ્ગિરા સ્વયમ્ ॥ ।
યે ક્રૂરદૃષ્ટ્યા વીક્ષન્તે નામસાહસ્રપાઠકમ્ ॥ ૩૫॥

તાનન્ધાન્કુરુતે ક્ષિપ્રં સ્વયં માર્તણ્ડભૈરવઃ ।
ધનં યો હરતે ચોરૈર્નામસાહસ્રજાપિનઃ ॥ ૩૬॥

યત્ર કુત્ર સ્થિતં વાપિ ક્ષેત્રપાલો નિહન્તિ તમ્ ।
વિદ્યાસુ કુરુતે વાદં યો વિદ્વાન્નામજાપિના ॥ ૩૭॥

તસ્ય વાક્સ્તમ્ભનં સદ્યઃ કરોતિ નકુલેશ્વરી ।
યો રાજા કુરુતે વૈરં નામસાહસ્રજાપિના ॥ ૩૮॥

ચતુરઙ્ગબલં તસ્ય દણ્ડિની સંહરેત્સ્વયમ્ ।
યઃ પઠેન્નામસાહસ્રં ષણ્માસં ભક્તિસંયુતઃ ॥ ૩૯॥

લક્ષ્મીશ્ચાઞ્ચલ્યરહિતા સદા તિષ્ઠતિ તદ્ગૃહે ।
માસમેકં પ્રતિદિનં ત્રિવારં યઃ પઠેન્નરઃ ॥ ૪૦॥

ભારતી તસ્ય જિહ્વાગ્રે રઙ્ગે નૃત્યતિ નિત્યશઃ ।
યસ્ત્વેકવારં પઠતિ પક્ષમાત્રમતન્દ્રિતઃ ॥ ૪૧॥

મુહ્યન્તિ કામવશગા મૃગાક્ષ્યસ્તસ્ય વીક્ષણાત્ ।
યઃ પઠેન્નામસાહસ્રં જન્મમધ્યે સકૃન્નરઃ ॥ ૪૨॥

તદ્દૃષ્ટિગોચરાસ્સર્વે મુચ્યન્તે સર્વકિલ્બિષૈઃ ।
યો વેત્તિ નામસાહસ્રં તસ્મૈ દેયં દ્વિજન્મને ॥ ૪૩॥

અન્નં વસ્ત્રં ધનં ધાન્યં નાન્યેભ્યસ્તુ કદાચન ।
શ્રીમન્ત્રરાજં યો વેત્તિ શ્રીચક્રં યઃ સમર્ચતિ ॥ ૪૪॥

યઃ કીર્તયતિ નામાનિ તં સત્પાત્રં વિદુર્બુધાઃ ।
તસ્મૈ દેયં પ્રયત્નેન શ્રીદેવીપ્રીતિમિચ્છતા ॥ ૪૫॥

ન કીર્તયતિ નામાનિ મન્ત્રરાજં ન વેત્તિ યઃ ।
પશુતુલ્યઃ સ વિજ્ઞેયસ્તસ્મૈ દત્તં નિરર્થકમ્ ॥ ૪૬॥

પરીક્ષ્ય વિદ્યાવિદુષસ્તેભ્યો દદ્યાદ્વિચક્ષણઃ ।
શ્રીમન્ત્રરાજસદૃશો યથા મન્ત્રો ન વિદ્યતે ॥ ૪૭॥

દેવતા લલિતાતુલ્યા યથા નાસ્તિ ઘટોદ્ભવ ।
રહસ્યનામસાહસ્રતુલ્યા નાસ્તિ તથા સ્તુતિઃ ॥ ૪૮॥

લિખિત્વા પુસ્તકે યસ્તુ નામસાહસ્રમુત્તમમ્ ।
સમર્ચયેત્સદા ભક્ત્યા તસ્ય તુષ્યતિ સુન્દરી ॥ ૪૯॥

બહુનાત્ર કિમુક્તેના શ‍ૃણુ ત્વં કુમ્ભસમ્ભવ ।
નાનેન સદૃશં સ્તોત્રં સર્વતન્ત્રેષુ દૃશ્યતે ॥ ૫૦॥

તસ્માદુપાસકો નિત્યં કીર્તયેદિદમાદરાત્ ।
એભિર્નામસહસ્રૈસ્તુ શ્રીચક્રં યોઽર્ચયેત્સકૃત્ ॥ ૫૧॥

પદ્મૈર્વા તુલસીપુષ્પૈઃ કલ્હારૈર્વા કદમ્બકૈઃ ।
ચમ્પકૈર્જાતિકુસુમૈઃ મલ્લિકાકરવીરકૈઃ ॥ ૫૨॥

ઉત્પલૈર્બિલ્વપત્રૈર્વા કુન્દકેસરપાટલૈઃ ।
અન્યૈઃ સુગન્ધિકુસુમૈઃ કેતકીમાધવીમુખૈઃ ॥ ૫૩॥

તસ્ય પુણ્યફલં વક્ત્તું ન શક્નોતિ મહેશ્વરઃ ।
સા વેત્તિ લલિતાદેવી સ્વચક્રાર્ચનજં ફલમ્ ॥ ૫૪॥

અન્યે કથં વિજાનીયુર્બ્રહ્માદ્યાઃ સ્વલ્પમેધસઃ ।
પ્રતિમાસં પૌર્ણમાસ્યામેભિર્નામસહસ્રકૈઃ ॥ ૫૫॥

રાત્રૌ યશ્ચક્રરાજસ્થામર્ચયેત્પરદેવતામ્ ।
સ એવ લલિતારૂપસ્તદ્રૂપા લલિતા સ્વયમ્ ॥ ૫૬॥

ન તયોર્વિદ્યતે ભેદો ભેદકૃત્પાપકૃદ્ભવેત્ ।
મહાનવમ્યાં યો ભક્તઃ શ્રીદેવીં ચક્રમધ્યગામ્ ॥ ૫૭॥

અર્ચયેન્નામસાહસ્રૈસ્તસ્ય મુક્તિઃ કરે સ્થિતા ।
યસ્તુ નામસહસ્રેણ શુક્રવારે સમર્ચયેત્ ॥ ૫૮॥

ચક્રરાજે મહાદેવીં તસ્ય પુણ્યફલં શ‍ૃણુ ।
સર્વાન્કામાનવાપ્યેહ સર્વસૌભાગ્યસંયુતઃ ॥ ૫૯॥

પુત્રપૌત્રાદિસંયુક્તો ભુક્ત્વા ભોગાન્યથેપ્સિતાન્ ।
અન્તે શ્રીલલિતાદેવ્યાઃ સાયુજ્યમતિદુર્લભમ્ ॥ ૬૦॥

પ્રાર્થનીયં શિવાદ્યૈશ્ચ પ્રાપ્નોત્યેવ ન સંશયઃ ।
યઃ સહસ્રં બ્રાહ્મણાનામેભિર્નામસહસ્રકૈઃ ॥ ૬૧॥

સમર્ચ્ય ભોજયેદ્ભક્ત્યા પાયસાપૂપષડ્રસૈઃ ।
તસ્મૈ પ્રીણાતિ લલિતા સ્વસામ્રાજ્યં પ્રયચ્છતિ ॥ ૬૨॥

ન તસ્ય દુર્લભં વસ્તુ ત્રિષુ લોકેષુ વિદ્યતે ।
નિષ્કામઃ કીર્તયેદ્યસ્તુ નામસાહસ્રમુત્તમમ્ ॥ ૬૩॥

બ્રહ્મજ્ઞાનમવાપ્નોતિ યેન મુચ્યેત બન્ધનાત્ ।
ધનાર્થી ધનમાપ્નોતિ યશોઽર્થી ચાપ્નુયાદ્યશઃ ॥ ૬૪॥

વિદ્યાર્થી ચાપ્નુયાદ્વિદ્યાં નામસાહસ્રકીર્તનાત્ ।
નાનેન સદૃશં સ્તોત્રં ભોગમોક્ષપ્રદં મુને ॥ ૬૫॥

કીર્તનીયમિદં તસ્માદ્ભોગમોક્ષાર્થિભિર્નરૈઃ ।
ચતુરાશ્રમનિષ્ઠૈશ્ચ કીર્તનીયમિદં સદા ॥ ૬૬॥

સ્વધર્મસમનુષ્ઠાનવૈકલ્યપરિપૂર્તયે ।
કલૌ પાપૈકબહુલે ધર્માનુષ્ઠાનવર્જિતે ॥ ૬૭॥

નામસઙ્કીર્તનં મુક્ત્વા નૃણાં નાન્યત્પરાયણમ્ ।
લૌકિકાદ્વચનાન્મુખ્યં વિષ્ણુનામાનુકીર્તનમ્ ॥ ૬૮॥

વિષ્ણુનામસહસ્રાચ્ચ શિવનામૈકમુત્તમમ્ ।
શિવનામસહસ્રાચ્ચ દેવ્યા નામૈકમુત્તમમ્ ॥ ૬૯॥

દેવીનામસહસ્રાણિ કોટિશઃ સન્તિ કુમ્ભજ ।
તેષુ મુખ્યં દશવિધં નામસાહસ્રમુચ્યતે ॥ ૭૦॥

ગઙ્ગા ભવાની ગાયત્રી કાલી લક્ષ્મીઃ સરસ્વતી ।
રાજરાજેશ્વરી બાલા શ્યામલા લલિતા દશ ॥ ૭૧॥

રહસ્યનામસાહસ્રમિદં શસ્તં દશસ્વપિ ।
તસ્માત્સઙ્કીર્તયેન્નિત્યં કલિદોષનિવૃત્તયે ॥ ૭૨॥

મુખ્યં શ્રીમાતૃનામેતિ ન જાનન્તિ વિમોહિતાઃ ।

વિષ્ણુનામપરાઃ કેચિચ્છિવનામપરાઃ પરે ॥ ૭૩॥

ન કશ્ચિદપિ લોકેષુ લલિતાનામતત્પરઃ ।
યેનાન્ય દેવતાનામ કીર્તિતં જન્મકોટિષુ ॥ ૭૪॥

તસ્યૈવ ભવતિ શ્રદ્ધા શ્રીદેવીનામકીર્તને ।
ચરમે જન્મનિ યથા શ્રીવિદ્યોપાસકો ભવેત્ ॥ ૭૫॥

નામસાહસ્રપાઠશ્ચ તથા ચરમજન્મનિ ।
યથૈવ વિરલા લોકે શ્રીવિદ્યારાજવેદિનઃ ॥ ૭૬॥

તથૈવ વિરલો ગુહ્યનામસાહસ્રપાઠકઃ ।
મન્ત્રરાજજપશ્ચૈવ ચક્રરાજાર્ચનં તથા ॥ ૭૭॥

રહસ્યનામપાઠશ્ચ નાલ્પસ્ય તપસઃ ફલમ્ ।
અપઠન્નામસાહસ્રં પ્રીણયેદ્યો મહેશ્વરીમ્ ॥ ૭૮॥

સ ચક્ષુષા વિના રૂપં પશ્યેદેવ વિમૂઢધીઃ ।
રહસ્યનામસાહસ્રં ત્યક્ત્વા યઃ સિદ્ધિકામુકઃ ॥ ૭૯॥

સ ભોજનં વિના નૂનં ક્ષુન્-નિવૃત્તિમભીપ્સતિ ।
યો ભક્તો લલિતાદેવ્યાઃ સ નિત્યં કીર્તયેદિદમ્ ॥ ૮૦॥

નાન્યથા પ્રીયતે દેવી કલ્પકોટિશતૈરપિ ।
તસ્માદ્રહસ્યનામાનિ શ્રીમાતુઃ પ્રયતઃ પઠેત્ ॥ ૮૧॥

ઇતિ તે કથિતં સ્તોત્રં રહસ્યં કુમ્ભસમ્ભવ ।
નાવિદ્યાવેદિને બ્રૂયાન્નાભક્તાય કદાચન ॥ ૮૨॥

યથૈવ ગોપ્યા શ્રીવિદ્યા તથા ગોપ્યમિદં મુને ।
પશુતુલ્યેષુ ન બ્રૂયાજ્જનેષુ સ્તોત્રમુત્તમમ્ ॥ ૮૩॥

યો દદાતિ વિમૂઢાત્મા શ્રીવિદ્યારહિતાય ચ ।
તસ્મૈ કુપ્યન્તિ યોગિન્યઃ સોઽનર્થઃ સુમહાન્સ્મૃતઃ ॥ ૮૪॥

રહસ્યનામસાહસ્રં તસ્માત્સઙ્ગોપયેદિદમ્ ।
સ્વતન્ત્રેણ મયા નોક્તં તવાપિ કલશોદ્ભવ ॥ ૮૫॥

લલિતાપ્રેરણેનૈવ મયોક્તં સ્તોત્રમુત્તમમ્ ।
તેન તુષ્ટા મહાદેવી તવાભીષ્ટં પ્રદાસ્યતિ ॥ ૮૬॥

શ્રીસૂત ઉવાચ -
ઇત્યુક્ત્વા શ્રીહયગ્રીવો ધ્યાત્વા શ્રીલલિતામ્બિકામ્ ।
આનન્દમગ્નહૃદયઃ સદ્યઃ પુલકિતોઽભવત્ ॥ ૮૭॥

(શ્રીબ્રહ્માણ્ડપુરાણતઃ)

પાશાઙ્કુશેક્ષુસુમરાજિતપઞ્ચશાખાં
 પાટલ્યશાલિસુષુમાઞ્ચિત ગાત્રવલ્લીમ્ ।
પ્રાચીનવાક્સ્તુતપદાં પરદેવતાં ત્વાં
 પઞ્ચાયુધાર્ચિતપદાં પ્રણમામિ દેવીમ્ ॥

Before we begin, let us offer ourselves at the feet of the Divine Mother, shrImat mahAtripurasundarI.

This introduction deals with the background on lalitAsahasranAma (the purANa etc) and the importance of Shri Chakra, the diagrammitical form for meditation. (Only a brief description is provided here since it has been extensively described by Adi Shankara in the text of SaundaryalaharI. A detailed description of Lalita yantra (Shri Chakra) is given in the Hindu Tantrik page http://www.shivashakti.com/)

Among the 18 purANas, brahmANDa-purANa is well known for the extolation of Lalita. It explains in detail the appearance of the Goddess Lalita to save the world from the clutches of the demon bhaNDAsura. There are three important sub-texts in this purANa.

The first of these texts is LalitopAkhyAna, consisting of 45 chapters and is found in the last chapter of the purANa. The last five chapters are especially well known. They

extol the greatness of the Divine mother, the significance of the mantra of the goddess (shoDashAkSharI-vidyA), the various mudras and postures to be practiced, meditations, initiations etc., and the mystical placement of the deities involved in Shri Chakra.

The next text is the lalitA trishati in which 300 names of the goddess is featured. There is a well known commentary on this work by Adi ShankarAchArya.

The third text is the celebrated LalitA sahasranAma, which consists of 320 verses in three chapters. The first chapter is 51 verses, and relates that the 1000 names of LalitA were recited by various devatas as commanded by the goddess herself. This chapter also explains that the verses are in anuShTup ChaNDaH(metre known as anuShTup) and that the deity Lalita is invoked in three kUTas (vAgbhava, kAmarAja, and shakti). The second chapter of the text contains the thousand names of the goddess in 182 1/2 verses (which is transliterated below). The third and final chapter is 86 1/2 verses long and enumerates the benefits accrued by reciting these one thousand names of the Goddess. This is mainly to encourage people to recite the names with concentration to achieve, if not anything else, a peace of mind.

Lalita trishati and lalitA sahasranAma are dialogues between the sage Agastya and the god Hayagriva (Pronounced as hayagrIva).

Hayagriva is the incarnation of ViShNu who assumed the form of a horse to kill a demon by the same name. Agastya was a sage of great renown, who is immortalized as a star in the celestial heavens(one of the seven Rishi-s, saptarShi or Ursa Major). He is the patron saint of Tamilnadu being a founder of a system of medicine called Siddha, and also having drunk the whole ocean in his kamaNDalum. According to yAska's Nirukta, Agastya is the half-brother of the great sage, VasishTha.

The story of the meeting of Agastya and Hayagriva is given in the lalitopAkhyAna and is quite interesting. Agastya was visiting several places of pilgrimage and was sad to see many people steeped in ignorance and involved in only sensual pleasures. He came to kA nchi and worshipped kAmAkShI and sought a solution for the masses. Pleased with the devotion and his caring for the society, Lord ViShNu appeared before Agastya and provided the sage Agastya with the solution of 'curing' the worldly folk from ignorance. He explained that He is the primordial principle, and the source and the end of everything. Though He is above forms and guNas, He involves himself in them. He goes on to explain that a person should recognize that He is the pradhAna (primordial) transformed into the universe, and that He is also the puruSha (conscious spirit) who is transcendental and beyond all qualities(guNa-s) and forms. However

to recognize this, one has to perform severe penance, self-discipline etc. If (since) this is difficult, Lord ViShNu advises that the worship of the goddess will achieve the purpose of life, given as liberation from bondage, very easily. He points out that even other Gods like Shiva and Brahma have worshiped the goddess TripurA. ViShNu concludes his discourse saying that this was revealed to Agastya so that he (Agastya) can spread the message to god, sages, and humans. ViShNu requests Agastya to approach his incarnation, Hayagriva and disappears from Agastya's sight.

Agastya approaches Hayagriva with devotion and reverence. Hayagriva reveals to Agastya that the great Goddess, lalitA, is without beginning or end and is the foundation of the entire universe. The great goddess abides in everyone and can be realized only in meditation. The worship of goddess is done with the lalitA sahasranamA (1000 names) or with trishati (300 names) or with aShTottaranAma (108 names) or with Shri Chakra (diagrammatical form for meditation).

In tantra shAstra, each devi/deva is worshipped as a mantra, and yantra. Shri Chakra is used to represent the divine mother diagrammatically. It denotes how the power of a small point in the centre of the Shri Chakra transforms itself into a series of triangles, circles, and lines. One can meditate on the Shri Chakra itself knowing the significance of the

triangles and circles. These forms respresent the various transformations of the Reality. One can realize that the universe has evolved through the undifferentiated consciousness and has eventually become the universe as we know it. The recitation of sahasranAma and trishati are used in the worship of Shri Chakra. The correspondence between Shri Chakra as a yantra and the fifteen letter mantra of the goddess (pa nchadashIvidyA, pronounced panchadashIvidyA) is achieved by carefully studying the Shri Chakra which is constructed using the symbolism of the three kUTa-s and the significance of the fifteen letters of the shrIvidyA. It is said that if meditation on Shri Chakra is not possible, recitation of the sahasranAma with utmost devotion would confer the same benefits, perhaps in longer time-frame.

The sahasranAma also mentions how to meditate on the various centres of consciousness (chakras) in one's body. Kundalini, meaning coiled up, ordinarly resides in the muladhAra chakra, at the base of spine, and when it rises to the sahasrAra chakra at the top of the head, one becomes aware of the ultimate reality.

Before reciting the sahasranAma, it is advised that the divine mother be meditated upon according to the dhyAna shloka-s, given in the beginning of the text. (reposted here with English meaning)

॥ ધ્યાનમ્ ॥

સિન્દૂરારુણ વિગ્રહાં ત્રિનયનાં માણિક્યમૌલિ સ્ફુરત્
    તારા નાયક શેખરાં સ્મિતમુખી માપીન વક્ષોરુહામ્ ।
પાણિભ્યામલિપૂર્ણ રત્ન ચષકં રક્તોત્પલં બિભ્રતીં
    સૌમ્યાં રત્ન ઘટસ્થ રક્તચરણાં ધ્યાયેત્ પરામમ્બિકામ્ ॥

The Divine mother is to be meditated upon as shining in a vermilion-red body, with a triple eyes, sporting a crown of rubies studded with the crescent moon, a face all smiles, a splendid bust, one hand holding a jewel-cup brimming with mead, and the other twirling a red lotus.

અરુણાં કરુણા તરઙ્ગિતાક્ષીં
    ધૃત પાશાઙ્કુશ પુષ્પ બાણચાપામ્ ।
અણિમાદિભિ રાવૃતાં મયૂખૈ-
    રહમિત્યેવ વિભાવયે ભવાનીમ્ ॥

I meditate on the great Empress. She is red in color, and her eyes are full of compassion, and holds the noose, the goad, the bow and the flowery arrow in Her hands. She is surrounded on all sides by powers such as aNimA for rays and She is the Self within me.

ધ્યાયેત્ પદ્માસનસ્થાં વિકસિતવદનાં પદ્મપત્રાયતાક્ષીં
    હેમાભાં પીતવસ્ત્રાં કરકલિતલસદ્ધેમપદ્માં વરાઙ્ગીમ્ ।
સર્વાલઙ્કાર યુક્તાં સતત મભયદાં ભક્તનમ્રાં ભવાનીં
    શ્રીવિદ્યાં શાન્ત મૂર્તિં સકલ સુરનુતાં સર્વ સમ્પત્પ્રદાત્રીમ્ ॥

The Divine Goddess is to be meditated upon as seated on the lotus with petal eyes. She is golden hued, and has lotus flowers in Her hand. She dispels fear of the devotees who bow before Her. She is the embodiment of peace, knowledge

(vidyA), is praised by gods and grants every
kind of wealth wished for.

સકુઙ્કુમ વિલેપનામલિકચુમ્બિ કસ્તૂરિકાં
   સમન્દ હસિતેક્ષણાં સશર ચાપ પાશાઙ્કુશામ્ ।
અશેષજન મોહિનીં અરુણ માલ્ય ભૂષામ્બરાં
   જપાકુસુમ ભાસુરાં જપવિધૌ સ્મરે દમ્બિકામ્ ॥

I meditate on the Mother, whose eyes
are smiling, who holds the arrow, bow,
noose and the goad in Her hand. She is
glittering with red garlands and ornaments.
She is painted with kumkuma on her forehead
and is red and tender like the japa flower.

May the Divine Mother guide us in our every
action and thought, and may She confer upon us
the greatest gift of all, mokSha, the liberation.

OM tat sat.

As mentioned in Brahmanda purana, Shyamala devi
(Mantrini) fought with Vishukra and killed him
with Brahmashironamakastra (a powerful weapon
named brahmashira). Dandanatha devi (Potrini)
killed Vishanga with her plough weapon and
pestle. However in Lalita sahasranama it is
mentioned that Vishukra was killed by Varahi,
and Vishanga was killed by Mantrini as above
- mantriNyambAvirachitaviSha NgavadhatoShitA
vishukraprANaharaNavArAhIvIryananditA

As a cautionary note, the sahasranAmastotram
and trishati are not readily available in the
Brahmandapurana book. It is possible that
they belong to khilAs (appendix) of the purana

added later.

sahasranAma encoding and notes provided by

Prof. M. Giridhar

Proofread by Kirk Wortman, DPD, Rajani Arjun Shankar

Brihatstotraratnakara part 2 by NR Acharya has

some verses and markings different than above.

---

*shrI lalitA sahasra nAma stotram*

pdf was typeset on August 27, 2023

Please send corrections to *sanskrit@cheerful.com*